द्रव्याय नमः इति संपूज्य वाराहीविद्यामुच्चार्य श्रीवाराहि एष ते बलिर्नमः इति मांसबहुलब-
लिमुत्सृज्य पुनस्तद्विद्यया तां संपूज्य नाराचमुद्रया बलिं ग्राहयित्वा योनिमुद्रया प्रणमेदि-
ति वाराहीबलिः ॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना कृते सौभाग्यरत्ना-

सौरः वीतरंगोत्पन्नविंशतिः ॥ ८६ ॥ अथ वटुकादिबलिः ततः शुद्धोदकेन चंदनादियुक्तेन वहन्नं
१६ सनेन ·· करोर्ध्वपुटहस्ताभ्यां श्रीचक्रस्य प्रागाद्याग्नेयनैऋतिवायव्यकोणेषु श्रीचक्रस्यान्तर
भागे च त्रितारमुच्चरन् चतुरस्रवृत्तत्रिकोणात्मकं मंडलपंचकं निर्माय ॐ ऐं ह्रीं श्रीं व्यापक
मंडलाय नमः इति प्रति प्रति मंडले संपूज्य ॐ वां वटुकभैरवाय नमः इति मंत्रेण प्रागादि
163 मंडले वटुकभैरवाय वां वीमित्यादि षडंगन्यासेन सकलीकृत्य कपालयोनि
मुद्रां प्रदर्श्य प्रोक्तमंत्रेण गंधादिभिः संपूज्य तदग्रे प्राग्वद्बलिपात्रं निधाय ॐ वटुकभै
रव बलिद्रव्याय नमः इति बलिद्रव्यं संपूज्य ॐ एह्येहि देवीपुत्र वटुकनाथ कपिलजटा
भारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा इति मंत्र
मुच्चरन् प्रागुक्तरूपं वटुकं ध्यायन् वामांगुष्ठानामिकाभ्यां संवेदके धारादानेन बलि
मुत्सृज्य पुष्पांजलिमादाय ॐ बलिदानेन संतुष्टो वटुकः सर्वसिद्धिदः शांतिं करोतु मे
नित्यं भूतवेतालसेवितः इति पुष्पांजलिं दत्वा प्रणमेदिति वटुकबलिः ततो द्वितीयमं
डले ॐ यां योगिनीभ्यो नमः सर्वयोगिन्य इहागच्छत इहागच्छतेति योगिनीरावाह्य प्राग्वत्
ध्यात्वा यां यीमित्यादिना षडंगमंत्रेण सकलीकृत्य योनिमुद्रां प्रदर्श्य ॐ यां योगिनीभ्यो
नमः सर्वयोगिनीश्रीपादुकां पूजयामीति गंधादिदीपांतैरुपचारैः संपूज्य प्राग्वद्बलि

पात्रे निधाय ॐ ऊर्ध्वब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा पाताले वानले वा स-
लिलपवनयोर्यत्र कुत्र स्थिता वा क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन
प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः यां योगिनीभ्यः सर्वयोगि-
नीभ्यो हुं फट् स्वाहा इति वामकराङ्गुष्ठमध्यमानामिकाभिर्योन्याकारेणायातिना-
भिर्बिन्दुधारादानेन बलिमन्त्रस्य पुष्पाञ्जलिमादाय ॐ या काचिद्योगिनी रौद्रा सौम्या
घोरतरा परा खेचरी भूचरी प्रीतास्ता मे सदा इत्यनेन पुष्पाञ्जलिं दत्त्वा योनिमुद्रया प्र-
णमेदिति योगिनीबलिः ॥ अथ क्षेत्रपालबलिः ॥ तत्रैव त्रिमण्डले ॐ क्षौं क्षेत्रपाल इहा-
गच्छ इहागच्छेति समावाह्य क्षां क्षीमित्यादि षडङ्गमन्त्रेणामकलीकृत्य क्षां क्षेत्रपाला-
य नमः इति गन्धादिदीपान्तैरुपचारैः सम्पूज्य तत्र प्राग्वद्बलिपात्रं निधाय क्षेत्रपालब-
लिद्रव्यं प्लावयन् मन्त्रितबलिं सम्पूज्य प्राञ्जलिकृतं क्षेत्रपालं ध्यायन् ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः
स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वाहा इति वामकराङ्गुष्ठतर्जनीभ्यां
मत्स्योदकधारादानेन बलिमन्त्रस्य पुष्पाञ्जलिमादाय ॐ योऽस्मिन् क्षेत्रनिवासी च क्षेत्र-
पालः स किङ्करैः प्रीतोऽयं बलिदानेन सर्वरक्षां करोतु मे इति पुष्पाञ्जलिं दत्त्वा योनि-
मुद्रया प्रणमेदिति क्षेत्रपालबलिः ॥ अथ गणपतिबलिः ॥ तत्र वामपद्ममण्डले गणपत-

सेभ· येनमः गणपत इहागच्छ इहागच्छेति समावाह्य गां गीं गूं इत्यादिना षडङ्गमन्त्रेण गन्धादिदी
१६४ पान्तैरुपचारैः संपूज्य तत्र प्राग्वद्बलिपात्रे निधाय श्रीगणपतिबलिद्रव्याय नम इति ब
लिं संपूज्य ॐ गां गीं गूं गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा
164 इति मन्त्रेण वामकरमध्यमाङ्गुष्ठाभ्यां गृहीतोदकधारादानेन प्राङ्मुखः पापगणपतये ब
लिं समर्प्य ॐ सर्वदा सर्वकार्याणि निर्विघ्नं साधयन्मम शान्तिकरो लम्बतनो विघ्नराजः
सदास्थितः इति पुष्पाञ्जलिं दत्वा योनिमुद्रया प्रणमेदिति गणपतिबलिः अथ योनिर
मण्डले ॐ सर्वभूतेभ्यो नमः सुरासुरनराद्याः सर्वभूतगणा इहागच्छत आगच्छतेत्यावाह्य
नानारूपान् ध्यायन् ह्रीं ह्रूं इत्यादि षडङ्गमन्त्रेण सकलीकृत्य मूलमन्त्रेण गन्धादिदीपा
न्तैरुपचारैः संपूज्य तत्र प्राग्वद्बलिपात्रे निधाय सर्वभूतबलिद्रव्याय नम इति बलिं संपूज्य
ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा सर्वभूतेभ्य एष बलिर्नमः इति वामकरस्य म
ध्याङ्गुलिभिर्गृहीतोदकधारादानेन बलिं समर्प्य पुष्पाञ्जलिमादाय ॐ भूता ये विविधाका
रा दिव्या भूम्यन्तरिक्षगाः पातालतलसंस्थाश्च शिवयोगेन भाविताः ऊर्ध्वाद्याः प्रान्तसं
स्थाकाः पार्ष्णिधाराविवस्थिताः ध्रुवाद्याः सन्त्यसंख्याश्च पीडया याः सा व्यवस्थिताः ते
प्यन्तु प्रीतमनसो भूता गृह्णन्त्विमं बलिं इति पुष्पाञ्जलिं दत्वा योनिमुद्रया प्रणमेदिति सर्व १६४

भूतबलिः ॥ अथोर्ध्वाम्नायीचक्रे राजराजेश्वरबलिं दद्यात् तत्र सर्वभूतबलिमंडलादुत्तरतः ।
प्राग्वन्मंडलं विधाय तत्रैव संपूज्य तत्र वक्ष्यमाणेन राजराजेश्वरमंत्रेण तमावाह्य ह्रां
ह्रीमित्यादिषडंगैः सकलीकृत्य देवं क्षेत्रपालवद्ध्यात्वा गंधादिभिः संपूज्य तत्र प्राग्वद्बलिपा
त्रं निधाय राजराजेश्वरबलिद्रव्याय नमः इति संपूज्य ॥ अमुकस्थाने क्षेत्रपालराजरा
जेश्वर इमां पूजां बलिं गृह्ण गृह्ण स्वाहेति वामकरमध्यमांगुष्ठाभ्यामच्छ्रोमन्तथा दा
नेन बलिमुत्सृज्य पुष्पांजलिमादाय ॥ अनेन बलिदानेन वटुवर्गसमन्वितः राजरा ।
जेश्वरो देवः सर्वदा मे प्रसीदतु इति मंत्रेण पुष्पांजलिं दत्वा योनिमुद्रया प्रणमेदिति राज
राजेश्वरबलिः ॥ अथ शाक्तो ऊर्ध्वाम्नायवाराहीबलिदानानंतरं श्रीचक्रस्योत्तरभागे मंडलद्व
यं कृत्वा तत्रैकस्मिन् त्रीशानादिमध्यान्तं प्राग्वन्मात्रपंचकं विधाय वटुकादिसर्वभूतानां ।
बलिपंचकं दत्वा । ऊर्ध्वाम्नायीचक्रे द्वितीयमंडले राजराजेश्वरबलिं दद्यात् अत्राप्यथ शाक्तो वैक
स्मिन्नेव मंडले एकमेव पात्रं निधाय तस्मिन् त्रीशानादिकोणचतुष्टये बलिचतुष्टयमध्ये ।
तु यस्मिन् निषण्णं बलिं दद्यादिति अयमपि निःसंदेहः न्यायकल्पः इत्थं बलिदानं विधाय ॥ सं
वीभ्यो बलिदेवताभ्यो नमः इति पुष्पांजलिना समस्तबलिदेवताः संपूज्य तालत्रयं दत्वा नं
राचम्य द्वावद्य ॥ बलिदानेन संतुष्टाः समस्तबलिदेवताः यथास्थानं विहरंतु परेष्टाः ।

क्षिप्रगामश्च वटुकाद्याः सुराः सर्वे सर्वसिद्धिविधायिनः मे प्रीतास्तु हितं यच्छन्तु सततं तन्नत्यसादतः
इत्युच्चार्य तानि विसृज्य प्रसन्नात्मा त्रिनामस्मरन् शुद्धोदकेनात्मानं प्रोक्षयेत् ॥ इति बलिदानवि
धिः ॥ अथ प्रात्यब्दे दशम्यां वा वत्सरे छागादिबलिं दद्यात् ॥ तद्यथा सर्वलक्षणसंपन्नं पशुं मूलमंत्रेण
स्नाप्य स्रग्गन्धादिभिरलंकृत्य देव्यग्रे स्थापयित्वा मूलमंत्रेण प्रोक्षणीजलेन प्रोक्ष्य अस्त्रमंत्रेण
संरक्ष्य कवचेनावगुंठनमुद्रयावगुंठ्य मूलेन धेनुमुद्रयामृतीकृत्य ॐ सर्वदेवतारूपिणे
बलिरूपायामुकपशवे नमः इति गन्धादिभिः संपूज्य तस्य दक्षिणकर्णे ॐ पशुपाशाय वि
द्महे विश्वकर्मणे धीमहि तन्नो जीवः प्रचोदयात् इति पशुगायत्रीं त्रिः पठित्वा पुरतः खड्गं
निधाय ॐ ह्रीं कालि कालि वज्रेश्वरि लौहदण्डायै नमः इति मंत्रेण गन्धादिभिः संपूज्य तस्य
मुष्टिदेशे ॐ वागीश्वरीब्रह्मभ्यां नमः मध्ये ॐ लक्ष्मीनारायणाभ्यां नमः अग्रे ॐ उमामहेश्व
राभ्यां नमः इति संपूज्य तेन तमभिमंत्रयेत् ॐ खड्गाय ब्रह्मरूपाय देवकार्याय तत्परः पशुः
छेद्यः त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते इति मंत्रेण खड्गमभिमंत्र्य गन्धाक्षतजलादिकमादा
य मूलविद्यामुच्चार्य अद्येत्यादि विष्णुर्ह्येवं तातेऽमुकगोत्रोऽमुकशर्मा दीर्घायुरस्तु ऊर्मि
तुष्टः स्वेनिवृत्तिपर्यमाने दद ग्रा प्रवमेधसमफलध्वजमालाकुलविमानवरारोहणपूर्व
देवीलोकगमनानन्तरप्राप्तभुवनसमावधि चिन्मयावेऽविजयकामः श्रीमन्महात्रिपुरसुंद

विः इमं पशुं त्वम्महेशि संप्रददे इत्युक्त्वा पुष्पाक्षतजलादिकं पशोः शिरसि निक्षिपेत्‌ ततः पशोः शि
रो हित्वा ॐ यस्मात्‌ पशवः सृष्टा यज्ञार्थं पशुघातनं अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः
शिवाय तन्निवेदयिष्ये मत्तस्त्वं शिवतां गतः तद्वत्पशुत्वं पशो देहि नाशिवस्त्वं शिवोऽसि हि इति वाय।
यित्वा खड्गमादाय सौः अस्त्राय फट्‌ छिन्धि छिन्धि स्वाहेति मन्त्रेण खड्गं तस्य स्कंधे योजयेत्‌ ततः स
यं देवीरूपो भूत्वा निर्विकल्पः सन्‌ तमेकेन प्रहारेण छिंद्यात्‌ सविकल्पः साधकस्तु परहस्ते
न च्छेदयेत्‌ ग्रासमात्रेण तिरिक्तैः स्वगात्रशोणितदानरूपो बलिर्देयः इति छागादिबलिदान
विधिः इत्थं बलिदानं विधाय मूलेन देवीं संपूज्य स्वर्णादिपात्रस्थजलपेयमद्यामलीकृ
त्य मूलविद्यया त्रिरभिमंत्र्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीश्रीपादुकायै समर्पयामीति स
मर्प्य सलिलं पावनं देवि शीतलं सुमनोहरं मया निवेदितं भक्त्या गृहाण परमेश्वरि इत्य
नेन देव्या वामभागे निवेदयेत्‌ ततो मूलान्ते श्रीमहात्रिपुरसुंदरि तृप्यामीति विज्ञाप्य स्वर्णादि
पात्रस्थं जलं पेयमद्यामलीकृतं मूलेनाभिमंत्र्य ॐ अमृतापिधानमसि स्वाहेति देव्या दक्षि
णहस्ते किंचिज्जलं दत्त्वा तथा प्राशनं विधाय परिभाव्य गतसारं नैवेद्यमुद्धृत्य नैवेद्यादि
शिष्टस्याप्यास्तं मंत्रेण गोमयोदकेन तत्स्थानं शोधयित्वा हस्तप्रक्षालनजलं दत्त्वा तेनैव हाप।
नोदार्थं सुगंधचूर्णानि दत्त्वा पुनर्हस्तप्रक्षालनार्थं जलं दत्त्वा कर्पूरादिसुवासितं जलं गंडू

क्रौ॰र॰ षाणि कारयित्वा कर्पूरखण्डकैर्लेदनशोधनं कारयित्वा पुनर्गण्डूषाणि कारयित्वा चरणोपचारात्मा च
१६६ मनीयं निवेद्य सूक्ष्मवस्त्रेणाकरचरणयोर्जलापनयनं कृत्वा सुगंधद्रव्यैः करौ सुरभीकृत्य सुगं
धानुलेपनमाल्यानि समर्प्य ताम्बूलमानीय श्रीपादुकां मूलमन्त्रमुच्चार्य श्रीमहात्रिपुरसुंदरी
१६६ग नमालदलकर्पूरपूगाभ्यां रंजितं सुघोषितं तेन रंगे च ताम्बूलमन्त्रं गृह्यतां इति ताम्बूलं निवेद्य पुन
न छत्रचामरादिराजोपचारान्निवेद्य समस्तपूजां कृत्वा ऊर्ध्वं ततः मूलविद्यामुच्चार्य श्रीमहात्रिपुरसुं
दरी श्रीपादुकां पूजयामि इति पुष्पांजलिभिस्त्रिः संपूज्य पुनर्मूलमुच्चार्य सर्वमन्त्रात्मके श्रीम
हात्रिपुरसुंदरी श्रीपादुकायै सर्वं कल्पयामि स्वाहेति सर्वं वदद्भ्यो दत्वा गंधपुष्पधूपदीपा
न्प्रदायान्निवेद्य दिति समस्तपूजां विधाय आरात्रिकं कुर्यात् तद्यथा स्वर्णादिरचितानि वर्ती
यथाशक्ति घृतेन गव्येन कर्पूरादिगर्भिताभिर्वर्तिभिर्दीपान् प्रज्वाल्य श्रीं ह्रीं
क्लूं स्त्रूं ह्स्त्रूं ल्लूं ह्रीं श्रीं इति नवरत्नेश्वरीविद्यया त्रिरभिमन्त्र्य चक्रमध्ये प्रदर्श्य रत्नेश्वरीविद्यां
पुनरुच्चार्य रत्नेश्वरी श्रीपादुकां पूजयामीति संपूज्य मूलेन मूले देवीमारात्रिकेण संपूज्य तत्र
मूलं कर्महृदयान्यावाहयेद् ढक्कादिवादनपूर्वकं देव्या मस्तकादिपादान्तं ९ मूलानि समस्तचक्रं च
केशिनी पुनर्देवि नवात्मिके आरात्रिकमिदं देवि गृहाण मम सिद्धये इति पठन् भ्रामयित्वा मस्तको
परि त्रिस्त्रिर्भ्रामयित्वा सर्वकं नवकृत्वो नीराजयेत् इति आरात्रिकविधिः अथ बलिविधानं

१६६

त्रिकं तत्र लोहवर्णै स्वर्णादिपात्रे कुंकुमादिना नवयोनिचक्रं विलिख्य ततः कविस्याद्वेस्रम
तिः शुभोदनेन नवधा विभज्य नवगोलकान्कृत्वा भानगोलकान्मम समदीपाधारणयोग्य
नि कृत्वा काराणि नव भाजनानि कृत्वा कविर्त्संस्थाप्य ततः शाकरायवगोधूमचूर्णानि
पिंड्रक्षुरस्य पुष्पेन परस्य रूपा धवलं मसृण समसमकान् नवगरुगणान्कृत्वा तानस्मिन्नवपात्रानि
वक्रे मध्यादिनवयोनिषु स्थापयित्वा पूर्वरविना निवभाजनानि मृन्मयानि एकैकक्रमेणते
पात्रमृत्परिस्थापयित्वा तेषु घृतं तपाविता स्रुणकापरूपादिमद्य विकीर्य तत्र शाकरामिश्रि
तानि यवगोधूमडग्धादि रचित्वा निम्नहिंग्रमित पिष्टकानि वर्तुलं गोलोन्नतानि स्वभिमत
मानानि वा त्रिकोणाकारमथवा तदुक्तवां आकाराणि वा घृतं तपाविता निदीपपात्राणि,
कृत्वा तेषां नवभाजनानामुपरि एकैकस्मिन् समसमस्थापयेत् ततस्तानि सुगंधियो
कृतवर्णानि कृत्वा तत्र प्रागवर्तीनि निक्षिप्य तस्मात्त्रेदव्याः पुरतो दक्षिणे वा चतुरस्रमंडले,
स्थापयित्वा तत्र गोमेधस्ववर्णमरकतपद्मरागनीलानीति गगनादीनां पंचरत्नानि,
निक्षिप्य भावयित्वा वा मूलविद्यया भवेन स्वर्णवादीपान्प्रज्वाल्य चक्रमध्ये प्रदर्शये,
ॐ ऐं ह्रीं श्रीं हूं गगनलोक गोमेदरत्नाय हूं नमः ४ सं लं स्वर्गलोक स्वर्णरत्नाय सं लं नमः
४ मं लं मर्त्यलोक मरकतरत्नाय मं लं नमः ४ पं लं पाताललोक पद्मरागरत्नाय पं लं नमः

सौ॰र॰ ४ मलं नागलोकनीलरत्नायनलं नमः इति स्वाग्रादिमध्यान्ते पादद्वितयेन संपूज्य प्राग्वदुक्तं
१८९ पवरीविद्ययाभिमंत्र्य संपूज्य पूर्वोक्तैः पंचसिंहासनमंत्रैः तथैव संपूज्य समन्याय घंटा
वादनपूर्वकं प्राग्वन्नीराजनं कुर्यात् ततस्तन्मध्ये तन्मंडले निधाय दीपमालामयं महः
167 पथपन वहिस्तन्तः संविन्नेत्रद्वारांततः संविद्रूपेण स्थितेति ध्यायेदिति विशेषारात्रिकं प्रा
कौयमस्महंतेनो वन्यवादिपुक्त कुर्यात् ततः स्वगुरूपदिष्टविधिना रात्रिकमध्यस्थं दीप
मंतर्पयेत् मूलविद्यया इति नीराजनविधिः अथ कुमारी सुवासिनी वा देवताबुद्ध्या देवी
प्रीतये पूजयेत् तद्यथा सर्वलक्षणसंपन्नां सुस्नातां सुपरिष्कृतां कन्यां सुवासिनीं वा सम
मानीय तस्याः पादौ प्रक्षाल्य सुवस्त्रेण संमार्ज्य पश्चात् तां पूजापीठसमुपवेश्य तस्याः
पादौ पादपीठोपरि निधाय सपादपीठस्थिरासनेन संदेपनोपागपीठपूजां विधाय तत्र
सुस्तिकासनोपविष्टायां तस्यां मत्राद्य रमयील दक्षीमात्रकारूपधारिणीं नवदुर्गात्मिका
सात्वां कन्यामावाहयाम्यहं इत्यावाह्य ४ वाला विद्याम्नज्वाये कुमारी श्रीपादुकां पूज
यामीति तस्याः पादौ त्रिः संपूज्य ततो गंधादिदीपांतैरुपचारैः संपूज्य सुवासिनीपक्षेत
सुवासिनी श्री माषोउपाहां कुमारीतिनकुर्यात् सुवासिनीतिनेत्रसंप्रदायः तत्राप्यविवाहि
मासुफलाधिकमिति ततः प्राग्वत् त्रिखंडामुद्रया वाहनी विद्यया चतस्यां मूलदेवीमावाह्य १८
३५

वाहनादिपरमीकरणं तेषामेवं कृत्वा मूलदेवीरूपां तां ध्यायन्नेतां भूषणादिपाद्यादिस
द्राक्षं प्रदद्यात् मूलेन पुष्पाञ्जलिभिः पाद्यदासनादिभोजनांतानुपचारानुपचर्याचम
नं दत्वा तांबूलं समर्प्य वस्त्रालंकारदक्षिणादिकं यथाशक्ति समर्प्य विसृजेदिति कुमा
रीपूजा ततो देवीपुत्रबुद्ध्या ॐ ह्रीं ऐं कुमाराय नमः इत्यनेन यथाशक्त्युपचारैः देवीप्री
तये कुमारमपि पूजयेत् इति कुमारपूजा ॥ तत्र भोगपात्रनिवेदनप्रदेशे स्वकीयकुमारीस्था
पूजितायै कुमारिकायै स्ववामिनै शक्तिपात्रे निवेद्य भोजनादिकं दत्वा विसृजेदिति
ततो वृत्ते समानेन गुरुः श्रीपादुकाविधया समभ्यर्च्य तदीयतस्मै निवेदयेत् तदभावे तत्स्त्री
य निवेदयेत् तस्याप्यभावे शिवः परमस्थाय गुरुरेव निवेद्य तत्प्रमाणविधिना त्रिः संतर्प्य तत्
प्रसादं स्वात्मनि योजयेत् ततो वटुकभैरवमन्त्रेण कुमारं संपूज्य पूर्वस्थापितवटुक
पात्रं तस्मै निवेदयेत् ततः पूर्वस्थापितं स्वपात्रमन्नाद्युत्तरवेणैकं स्वात्मनि योजयेत्
पि॥ इति भोगपात्रसमर्पणविधिः भोगपात्राभावपक्षे कुमारीवटुकयोरेव पूजनं तत्रापि कुमार्या
एवावश्यकमिति ततो मूलेन मूलदेव्यां पुष्पाञ्जलिं विधाय मूलेन मालापात्रमत्रैव वि
धाय मूलविद्यया कृष्णादिकरषडङ्गन्यासानपि विधाय कामकलारूपमात्मानं ध्यायेत् त
त्रिकोणान्तस्थापनमष्टदलावहां निजदेहमन्याकारं विभाव्य बिन्दुत्रयहार्दकलात्मकं तत्पेस

सौर॰ रेध्यात्वा नभोमध्ये विंदुं केशाकारं यवयवसमेन आनने मध्ये विंदुत्रयं वा हृच्चतुर्थाय यवयव।
१६८ समेनेत्तन्मंडले नदधोमात्राया दह्यपाय यवयवसमेनो योनिं विभाव्यात्मानमविनद्रूपं ध्या
त्वा मूलविद्यां दशधा जपित्वा मूलविद्यां देवीरूपमात्मानं ध्यायन्नाशिरसि कामेश्व।
योर्दिवि ज्ञात्वा: पंचदशनित्यामाल्लनद्वियपासंपूज्य अआ एकचटतपयषत्रामपिशाकिश्री
पादुकां पूजयामि ऋॠ ऐ खछवधफरलक्षमिपाकिश्री उऊ गजेड दवलल ऌलापाकि।
श्री कखघाजयकठपभवमेयेवुपाकिश्री लॡ ऌ अः णनमपाहवेषापापाकिश्री इ
तिशिरसिवसंपूज्य ४ ॐ ह्रीं हंसः सोऽहं स्वाहा स्वात्मनेनमः इति स्वात्मानं शिवं विमुष्याज
लिना पूजयेत्त अत्र पंचभूतमंत्राणामादौ त्रिनारयोजना आत्मा छादनमंत्रानेसमाव
रीयोजनाचनास्तीति रहस्यापंचमप्रदायः इत्यमात्मानं संपूज्य जपमालामानीयपंचवि
मात्रेवामपाणौवा निधाय मूलविद्यया सामान्यार्घोदकेनाभ्युक्ष्य ॐ मां मालेमहामा
येसर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव ह्रीं सिद्ध्यैनमः इति
गंधादिभिः संपूज्य गं अविघ्नं कुरुमालेत्वं इत्यनेन दक्षिणहस्तेमालां गृहीत्वा स्वशि
रसि सहस्रारे हंके देपीतवर्णां विद्यां हृदये श्रीपरदेवतां श्रीगुरुचरणयोरात्मानं च ध्या
त्वा भ्रूमध्यस्याज्ञाचक्रे गुरुमंत्रदेवतात्मनामैक्यं विभाव्य कण्ठस्थविशुद्धिचक्रेण
१६८

स्वतन्त्रस्थमेकीभूतमानीय श्रीपरदेवताचरणद्वन्द्वं ध्यात्वा मूलविद्यया हृदयकमलमानी
य तत्र श्रीपरदेवतां ध्यायन् मन्त्रार्थेकृतचित्तो हृदयसमीपे मालामानीय दक्षिणहस्त
मध्यमाङ्गुलिमध्यपर्वणि संस्थाप्य कनिष्ठाग्रग्रीवा तर्जनीकायः सव्यमङ्गुष्ठतः कंबुमीलनरहि
तमखण्डाखण्डादिदिशाङ्गुष्ठमकुर्वन्नङ्गुष्ठाग्रेण चालयन् तर्जन्या मालामस्पृशन् इति बीजमन्त्र
मुच्चरन् एकबीजजपसमये परबीजमङ्गुष्ठेनास्पृशन् मेरुहस्तेन मालामस्पृशन् स्थापि
तस्यानामिकास्थानान्तरं समर्पयन् तन्तोलयन् मेरुममुल्लङ्घयन् परिवर्तनकाले सव्याङ्गुष्ठमका
रयन् अङ्गुष्ठाग्रेण मध्यमामध्यपर्वस्थबीजं परिवर्तयन् प्रणवोच्चारणपूर्वकमारभ्या
भिमतसंख्याजपं समाप्य पुनः प्रणवमुच्चार्य ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम
शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति मन्त्रेण मालां शिरसि संस्थाप्य पुनः प्राणा
याममन्त्रपं कृत्वा ऋष्यादिकरषडङ्गन्यासाशु कृत्वा गमन्त्रार्थं दशांशजपं विना पुनः प्राणा
यामादिपूर्वकं ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि
स्थिता इति मन्त्रेण सामान्यार्घ्योदकेन देव्या वामहस्ते जपं समर्प्य मालां गोमुखमन्त्रेणास
सूत्रेनैव रहस्यस्थापयेत् मालाभावे करमालया जपं कुर्यात् तत्र नामिकामध्यप
र्वादि तर्जनीमूलपर्वपर्यन्तं दशपर्वरूपा अनामामूलपर्वादिमध्यमामूलपर्वादिमध्य

मोर॰ १६५ 169

मामूलपर्येनावामान्तकामालयान्तुसैवान्तःशेजपः सानन्तलोमविलोमस्याकारादिल॰
कारान्तामविंदुकवर्णनिश्रिके अवगोग्रहवर्गयोगेनाष्टोत्तरशतामरत्तूयान्नैमन्तकान्त
लादिवर्णैरंधोन्तेमनुमालाः ॐ अलिनीसत्त्वेणग्रथितानि जपकरूपदिष्टविधिनाजपमालेभ
वनीयभोजन्स्तंहिंसमस्तादिसंख्याव सानेकार्यः नन्तुपन्थाहितिरिति अस्याविद्यया
निषितपूर्वसहस्रमर्पितेप्रानमशेत्तरशतेनैवादिनंजेवा नहिन्नजमित्यत्रनाथनवा॰
नियाघटिकाद्वरजनिनैकविंशत्सुत्तरशतसंख्याकंजपः अंगेजपः सिद्धविषयः अंगा
मविद्यास्तु हृदयंकेश्वराविद्यासन्नहितनित्याविद्यानिषिनित्याविद्याचेतिदशविद्यासमा॰
वशपकाः शाक्तोत्तंपंचविंशतिनित्याविद्याः पंचसिंहासनगतारविंशतिविद्याः चतुःसमय॰
श्रेणोक्ताभयमालिनीमन्त्रेणनिवाः सर्वाविद्याकमकलाविद्यान्तरीयविद्यानन्तरपरार॰
हूऊल्लाचेतिसमचत्वारिंशत्संख्याकाः विद्याजप्याः ऊर्ध्वाम्नायपीठेदकषोभम्चरणापोदाश्श
विद्यापञ्चाधारविद्याश्रितित्रयोविंशतिविद्याजपेत् अत्राप्यवशाक्तोचरणविद्यामूलविद्याचे
तिकेवलप्रासादपरा प्रासादपरेतिनश्रुतयोरेकतरंतडभयंवाजपेत् षडन्वयशांभवदी
क्षितनश्च दैवदेवीनोद्वादशविद्याः पृथकुजपेत् ततःसिरस्कारिणीविद्याभवनेपीठरहिता
दर्शनेमंत्रान्यचवर्जपेत् तेनश्रीविद्यागमन्नाश्रुतरायतनसमनाधकनरशतनंसंख्याका॰ १६५

भवति तत्त्वपथाप्राप्तिर्जयेत ॥ श्रीविद्यानंदनाथेन तु शिवयोः प्रियसूनुना कृतेयं गाढिं॰
प्राप्तिनमस्तं गोवत्सागरे २ नतोस्मि तल्लविद्यया देव्याः पुष्पाञ्जलिं कृत्वा येनावादतस्त्वे
के देवीस्तोत्रपठेन तथा श्रीकुब्जिकाप्राहृदये पंचसिंहासनात्मके फलं कल्पलता
नां च वाकर्त्तत्स्फुरत्कले चतुरायतनतानेदि चतुरंत्यपकोणागे त्रिस्थाने द्विपरत्रयस्यधाम
नौमि सिद्धवामये गणेशग्रहनक्षत्रयोगिनीराशिस्वरूपिणीं देवीमंत्रमयीं नौमि मातृका
पीठरूपिणीं प्रणमामि महादेवीं मातृकां परमेश्वरीं कालहृल्लोहहल्लोहलकलना॰
शामकारिणीं यदत्रैकमात्रेणापि सिद्धस्पर्धते नरः रविताक्ष्र्येन्दुकंदर्पशंकरानल॰
विस्मभिः यदक्षरशशिज्योत्स्नामण्डितं भवनत्रयं वंदे सर्वेश्वरीं महाश्रीसिद्धमातृकां॰
यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयं ब्रह्माण्डादिकटाहान्तं तां वंदे सिद्धमातृकां यदेका॰
दशमाधारं बीजं कोणत्रयोद्भवं ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते अकारादि
नोक्षपर्यन्तवर्णिनीस्य छागवाहनहस्तकटिपादनिवासिनी तासामेकान्तरोद्धा
रोस्मायन्मारोपरान्तरो प्रणमामि महादेवीं परमानंदरूपिणीं अद्यापियस्याजानंति नम
नागपिदेवताः केयं कस्मात्क्व केनेति सरूपारूपभावना वंदे तामहमक्षय्यक्षकारा॰
क्षररूपिणीं देवीकुलकलोल्लोलप्रोल्लसन्तीं परां शिवां वर्णानुक्रमयोगेन यस्या॰

सौर· १९२ 170

मात्राष्टके स्थिते वेदेन्नामष्टवर्गेऽस्य महासिद्धाष्टके पुरै वै कमष्टाणिजका व्याख्यापीठो
तानिवासिनी चलत्वाज्ञाकोशाभक्तानोमि श्रीत्रिपुरामहे इति द्वादशभिः श्लोकैः स्तवेनस्त
वैसिद्धिकेन देव्याः स्तवं उद्रूपायां स्तवनेन वनयुतः इति स्तुत्वा पुष्पाञ्जलिमादाय श्लो
वैदिकैः पौराणिकैः स्तवैः स्तुत्वा तां देव्याश्चरणयोः क्षिपेत् ततः प्रार्थनमन्त्रो वद्धा प्रार्थ
नस्तवं पठेत् किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां का का कीर्तिः कुलकमलि
नि प्राप्यते न स्तुतायां का का सिद्धिः सुरवरनते प्राप्यते नार्चितायां कं कं योगं त्वयि न चि
न्तिते चित्तमाले विनायासं सर्गसंहारसंरम्भकारिणि यायाषविभ्रमे चिद्वेदमहत्त्यान्तः स्थानम
लेहरवल्लभे जगदाह्लादनोद्योतयामाभोगविद्योतिनि स्थितिभावस्थितेऽगौरि नमः
स्पाप्त्यन्त्रिविके भावाभावप्रपञ्चस्वभावोदयधामिनि चैतन्यपञ्चके देवि नमस्ते
भोहराभावे तृष्टिस्थितिप्रपञ्चसंहारप्रत्युद्गतपदोदये चिद्धिद्योतमहासत्तामात्रेमोक्षके न
वह्न्यर्कशीतकिरणत्रयचक्रान्तरोदिते चतुःपीठप्रदीपिके नम त्रिपुरसुन्दरि चरा
चरमिदं विश्वं प्रकाशयसि यासएव मातृकारूपमास्थाय पतत्स्व मातर्नमोस्तुते स्व
तामवमयंपरे शिवसिन्धुसंभेकरी स्तुतानतेवाछिन्नेवस्तु ददासि करुणाकरे भक्त
सर्वेनिषेव्यज्ञापुत्रस्व परमेश्वरि वाग्भवादिमहासिद्धिदे हि त्रिपुरसुन्दरि परमा

१९२

नेदसंदोहस्यमोदभरनिर्भरे ऊः खेचरपरिम्लानवदनेत्राहिमांशिवे याहृदुह्यमये स्वच्छे देवित्रिपुरसुंदरि य।
थाशक्ति जपं पूजां गृहाण मदनुग्रहात् द्रव्यहीनं क्रियाहीनं मंत्रहीनं च यद्भवेत् तत्सर्वं क्षम्यतां ।
देवि त्वमनस्य परमेश्वरि यन्मया क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु तत्सर्वं तावकी पूजा भूयाद्भूत्यै
नमः शिवे यन्मयोक्तमिहाज्ञानान्नानन्यमहत्त्वल्पमेव वा हंतन्तत्सर्वं जगद्धात्रि चिद्देन नव्यमयमेजलिः
दैनान्दैन्यमहामोहध्वांतविध्वंसपणास्तु नमः भासा निवसयन्त्येको गोलोकशः शाक्तिसंयुतः प्रतिभासा
गतोल्लासो निशाकरस्वापरः मुक्तिमुक्तः सृजय निवद्धकल्लोलवान्विततः षड्विंशत्तत्वभरितेन्दे
त्रयः पालपत्मलेदेवेशं नमहे नौमि वारुणास्यं महाबले चतुःपीठनिवासिन्यो योगेश्वर्यो मह
हाबलाः चतुष्षष्टिप्रकारा या सानित्यं वेदकुलागनाः भेदाभेदमहामोहविवर्त्तपरिमण्डितो।
आस्यस्थपंक्तीमयोज्ज्वालविशाणिनमाम्यहं इति स्तुत्वा पुष्पांजलिं कृत्वा मातृस्तोत्रेण पिरनुं हस्तुत्वे
प्रणम्य ॐ सर्वशाक्तिकमोक्षद्रूतिप्रभस्वाहमिहात्मिका देवस्य देवतानां काचित्से विनस्तु खेमयीप्रये
रत्नस्तुसखरत्नमस्कारमुद्रां प्रदर्शयेत् ततः प्रदक्षिणानि कृत्वा ॐ सर्वमंगलमांगल्ये शिवे सर्वार्थसाध
के शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते इति श्लोकं सप्तधा पठित्वा गुरुपदेशविधिना साष्टां।
गेन वा पंचांगेन वा गंधाक्षतैः प्रणमेत् ततः त्रितारसर्वसंस्ति न नस्वस्तिक कमठमुद्रियोन्याख्याभिः
पंचमुद्राभिः प्रणमेत् पुनः साष्टांगं प्रणम्य भूमौ सर्वलिंगपदानो भूमिरेवावलेवनं लपिजा।

सौर॰ तापरीधानं त्वमेव शरणं शिवे अपराधो भवत्येव सेवकस्य पदे कोपरः सहते लोके केवलं।
१९ स्वामिनो विना अपराधसहस्राणि क्रियन्तेहर्निशं मया दासोयमिति मां मत्वा क्षमस्व परमे।
श्वरि ततनेत्रोत्तानेतावापि पुत्रयाचितवत्त्वं शिवे ममकृत्यमिदं सर्वमिति मानः क्षमस्व मे इति
171 बहुधा प्रणतिपूर्वकं क्षमाप्य आर्घोदकं तुल्यकेन पात्रान्तरेण चादाय ४ इतः पूर्वं प्राणबुद्धिदे
हधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तिषु अवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण
शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं गुह्येदेव्यै समर्पितं मम स्वाहा ओं मदीयं च सकलं श्रीमत्त्रि।
त्रिपुरसुन्दर्यै समर्पयामि ओं तत्सदित्यनेन देव्याश्चरणारविन्दयोर्गृहीतोदकदानेनात्मानं समर्प
येत् ततऊर्ध्वाम्नायोक्तं महत्तरीयानीतोहं सर्वेन त्वत्समुद्धृतमात्मानं यः अन्तरात्मे।
यणा भवति तथा भगवत्यै समर्पयामीत्यनेन तिः कल्पमात्मानमर्पयेत् ततः सर्वोल्लस
लसमयविग्रहां केवलपुष्पाणामञ्जलिं देवीमसमवारमभ्यर्च्य कृताञ्जलिः ओं यद्दत्तं भक्तिमात्रे।
णपत्रं पुष्पं फलं जलं निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया आवाहनं नजानामि नजानामि।
विसर्जनं पूजाभागं नजानामि त्वं गतिः परमेश्वरि कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मे
म अनुसारेण भक्त्या नोद्धृतोहं परमेश्वरि मातर्योनिसहस्रेषु येषु येषु व्रजाम्यहं तेषु तेषु
अच्युता भक्तिरच्युतेस्तु सदा त्वयि देवी धात्री च माता च देवी सर्वमिदं जगत् देवी जयति सर्वत्र

१९

योदेवीमहमेवहि: यदक्षरपरिभ्रष्टं मात्राहीनं च यद्भवेत् तत्सर्वं क्षमितं देवेशि काकस्तनसङ्कल्पितं मनः
त्वमसि देवदेवेशि त्रिपुरे परमेश्वरि तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे इति संवेदनमाध्य
यानिमन्त्रया प्रणमेत् ततः शंखं विसर्जयन्देव्युपरि भ्रामयित्वा साधु वासाधु वा कर्म यद्यदाच
रितं मया तत्सर्वं कृपया देवि गृहाणाराधनं मम इति मन्त्रमुच्चार्य देव्या दक्षहस्ते शंखं जलं किं
चिद्दत्वा पुनः शंखं दक्षे देव्याः शिरसि दत्वा शंखं यथास्थाने निवेशयेत् तत्र जलं किंचिद्वाम
हस्ते निधाय तस्मिन्सुजावशिष्टं किंचिद्रूपमालोड्य मूलेन सप्तवारमभिमन्त्र्य तेन जलेना
त्मानमभ्युक्ष्यान्यानपि साधकान् शंखजलेन प्रोक्षयेत् ततः पुष्पांजलिमादाय इतिमनु
यामज्ञा देव्याः स्वत्र पूजितदेवताः श्रीमत्पदपुंगलीनाः सन्तु सर्वशोभावहाः इति पुष्पांजलिं
दिशापरिवारगणानुगणशायान् सर्वदेवताः श्रीदेवतासहितान् मूलदेव्या देहे विली
नान्विभाव्य सर्वकामकलारूपमात्मानं ध्यात्वा देव्याः पदभूषणं रूपमायुधं च तत्सर्वं नि
जदेहे विचिन्त्य देवीरूपमात्मानं ध्यायन् विचरेन्मन्त्रं वक्ष्यामि तद्बीजेन देवी प्रणम्य मूलवि
द्यान्ते भगवति श्रीमहात्रिपुरसुन्दरि त्वं मम सन्तितालक्ष्येण देवी प्रदीप तेजोमयी विचिन्त्य ॐ ग
च्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि यत्र ब्रह्मादयो देवा न विदुः परमं पदमित्युच्चार्य तेजो
रूपो जो सहाशस्व देया निर्माल्यपुष्पेण तत्तेजः समद्धृत्याघ्राय इरकयोगेन शिरस्य सहस्रद

सौर १९ 172

त्कमले प्राणपथ्यनन्तर्गतां तेजोरूपं ध्यात्वा सुषुम्णामार्गेण नीत्वा ऐं हृदयाय नमः इति हृदयक
मलमानीय तत्र यथाकरूपां देवीं ध्यायेत् ॐ तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वरि यत्र ब्र
ह्मादयः सर्वे सुराः तिष्ठन्ति मे हृदि इति हृदयकमले संस्थापयित्वा तत्र यथाक्रमं सिंहासनमध्य॰
गत श्रीचक्रमध्यगतां सपरिवारां परदेवतां मानसैरुपचारैः संपूज्य पुनस्तेजोरूपां तां ॐ॰
ह्लीं नीरूपेण मन्त्रादिव्रह्मरन्ध्रान्ते ध्यात्वा मूलाधारे स्थापयेत् ततो यथान्यासं जलेन त्रिकोण
वृत्तचतुरस्रमण्डलं निर्माय तन्मध्ये शोषिकाल्यां निर्माल्यवासिनीं तन्मन्त्रेणावाह्य षडङ्गन्या
सेन सकलीकृत्य तत्र तां ध्यायेत् तद्यथा मातङ्गीं नवयावकादिचरणां ओं ह्लां सिद्धसाध्य॰
कां वीणां ह्लां सिकरां समन्ततः ऊचां मुक्तापवालावली हारां गीं सिततां वेउं लयत्रां विवाध॰
रां सुस्मितां नाम्नाकीर्णालकवेणीं मत्तनयनां ध्यायेच्छुकश्यामलां इति जप्त्वा मोहिनीं निर्मा॰
ल्यवासिनीं तस्याः योहषड्रूपां ह्लवोधरादीन्मूलदेवीविम्बतिम्बत्तमैरुषड्रूपगणेशादीना॰
मुच्छिष्टभोजिनः कोणषट्कोणानादिषु ततस्त्रिनिर्माल्येन तर्पयित्वा मध्ये मूलदेवीं निर्माल्येन॰
तदुच्छिष्टभोजिनीं तां पूजयेत् तत्र तस्मण्डलस्य ईशानकोणगणेशानिर्माल्येन ॐ लेवोदरा
य नमः इति लेवोदरं पूजयेत् ततः आग्नेय सूर्य निर्माल्येन तेजश्चण्डांशवे नमः नैऋत्ये विष्णुनिर्मा
ल्येन ॐ विष्वक्सेनाय नमः वायव्ये शिव निर्माल्येन ॐ [illegible]

१९

ततश्चाग्नेयदले पिनिर्माल्येन तेजश्चण्डाय नमः नैरृत्ये विस निर्माल्येन ॐ विष्वक्सेनाय नमः वायव्ये शि-
वनिर्माल्येन ॐ वृषभवाहनाय नमः इति तत्तन्निर्माल्येन गंधादिभिः पंचोपचारैः संपूज्य त्रिकोणमध्ये
प्रकृतिरूपभवनेश्वरपीठं विशालक्षुपासनपदेन तन्निर्माल्येन ॐ चण्डेश्वर्यै नमः इति निर्माल्यवासिनीं
संपूज्य ततः त्रिकोणमध्ये देवीनिर्माल्येन ५ ऐं नमः उच्छिष्टचाण्डालिमातङ्गि सर्ववशंकरि स्वाहा
शेषिकाश्रीपादुकां पूजयामीति निर्माल्यपुष्पैः त्रिः संपूज्य तन्निर्माल्योदकादिभिः पाद्यादि दी-
पान्तान्युपचर्य नैवेद्यस्य शतांशं सहस्रांशं वान्नव्यञ्जनोदकेन च समर्पयेत् ततो निर्माल्यपुष्पा-
ञ्जलिमादाय ॐ लेह्यचोष्यान्नपानादि ताम्बूलं सविलेपनं निर्माल्यभोजनं तुभ्यं ददामि श्री-
शेषवासिन्या इत्यनेन पुष्पाञ्जलिं कृत्वा तालत्रयपूर्वकं प्रणिपत्य क्षमस्वेति विसर्जयेत् इति नि-
र्माल्यवासिनीं पूजयित्वा ततस्तालत्रयपूर्वकं ॐ देवनाथ गुरो स्वामिन् देशिक स्वात्मनायक
त्राहि त्राहि कृपासिन्धो पूजां पूर्णतरां कुरु इति श्रीगुरुं प्रार्थ्य कराभ्यां श्रीपात्रमामलकमुद्धृत्य शि-
रसि शिवनाथश्रीगुरवे समर्प्य तत्पात्रं दक्षिणकरे निधाय ५ गुरुपादुकाविद्यां तेन श्रीगुरुकान-
दनाथश्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य तत्पात्रं यथास्थाने च संस्थाप्य तन्मध्ये किंचित्पात्रान्त-
रे निधाय ५ ऐं प्रथमकूटं आत्मतत्त्वाय नमः ५ क्लीं द्वितीयकूटं विद्यातत्त्वाय नमः ५ सौः तृ-
तीयकूटं शिवतत्त्वाय नमः ५ ऐं क्लीं सौः समस्तविद्यामन्त्रान् सर्वतत्त्वाय नमः इति तत्सिञ्चले-

सौ०र०
१७३
173

तत्त्वचतुष्टयं विन्यस्य तत्त्वालेपुनः पात्रान्तरेणोद्धृत्य स्रुक्स्रुवेनादाय मन्त्रोन्मायलेशानिवृत्य ४ प्र
कृतिपुरुषाहंकारमनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवा
य्वग्निसलिलपृथिव्यात्मकाशुद्धचत्वारिंशतितत्त्वसहितेऽस्याभिमन्यादि १६ ऐं प्रथमकूटात्मा
त्मकस्थूलदेहं शोधयामि स्वाहा मायाकलाविद्यारागकालनियतिपुरुषात्मकशुद्धाशुद्ध
सप्ततत्त्वसहितेनैकेन २५ द्वितीयकूटविद्यातत्त्वात्मकसूक्ष्मदेहं शोधयामि स्वाहा शिवश
क्तिसदाशिवेश्वरशुद्धविद्यात्मकपंचशुद्धतत्त्वसहितेन परं सौः तृतीयकूटशिवतत्त्वात्मके पर
देहं शोधयामि स्वाहा शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकलारागनियतिपु
रुषप्रकृतिपुरुषाहंकारमनः श्रोत्रत्वक्चक्षुः जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरू
परसगंधाकाशवाय्वग्निसलिलपृथिव्यात्मकशुद्धमिश्राशुद्धषट्त्रिंशत्तत्त्वसहितेन बालां मूल
विद्यां चोच्चार्य सर्वतत्त्वस्थूलसूक्ष्मपराख्यदेहत्रयाभिमानिने शोधयामि स्वाहा इति स्रुक्
चतुष्टयं संहृत्य तत्पात्रे कराभ्यामादाय मूलविद्यां गुरुपादुकाविद्यां चोच्चार्य प्रकाशा
मर्शहस्ताभ्यां स्ववलेव्योम्नी स्रुचं धर्माधर्मकलास्नेहपूर्णम ज्ञाने होमकरे इत्युच्चार्य तत्
त्वे शाम्भवीपात ततः कराभ्यां मूर्धादिपादांतं सर्वांगं षट्त्रिंशत्तत्त्वात्मकतां भावयन् स्वदे
हस्पर्शेन अथैतावत्कर्मशाक्तो संध्याप्रकरणोक्ताचमनविधिना तत्त्वचतुष्टयं शोधयेत्

१७३

ततः स्वसामयिकान्स्वयथाशास्त्रं यथागुरूपदेशं संभाव्य तेषु परितुष्टेषु बलिविसर्जनं कुर्यात् । त-
त्र पूर्वं स्थापितबलिपात्रस्य मन्त्रादिकमेकस्मिन्पात्रे कृत्वा तद्गृहीत्वा मोदकपात्रहस्तः पूजागृ-
हाद्बहिर्गत्वा जलेन पूते देशे चतुरश्रं तन्त्रिकोणात्मकं मण्डलं कृत्वा तत्र गदादि मूलं स्मरन्पात्र-
हस्तस्त्रिलोचनं कृत्वा भैरवं सर्वविघ्नविनाशनं वामाधःकरमारभ्य वामोर्ध्वकरपर्यन्तमायु-
धध्यानं इत्युच्छिष्टभैरवं ध्यात्वा गन्धादिभिः संपूज्य ॐ ऐं ह्रीं श्रीं उच्छिष्टभैरव एह्येहि बलिं गृह्ण
गृह्ण हुं फट् स्वाहा इति मन्त्रेण तस्मिन्मण्डले पात्रस्थं बलिद्रव्यं विसृज्य तत्पात्रं हस्तौ पादौ प्र-
क्षाल्याचम्य तत्पात्रे जलेनापूर्य पूजागृहद्वारं गत्वा तद्यो हित्वा लिङ्गुवत् अन्तः प्रविश्य स्वासने
समुपविश्य तत्पात्रस्थं जलं विप्रोक्ष्य जलं विन्दुं दत्वा तेन जलेन सामयिकानभिषिंचन् स्तो-
त्रं पठेत् तत्र श्रीवामकेश्वरतन्त्रे षट्शान्ते नश्यन्तु प्रेतकूष्माण्डा नश्यन्तु दूषका नराः
साधकानां शिवाः सन्त्वाम्नायपरिपालिनां जयन्तु मातरः सर्वा जयन्तु योगिनीगणाः जय-
न्तु मातरः सर्वा जयं योगिनीगणाः जयन्तु सिद्धडाकिन्यो जयन्तु गुरुपङ्क्तयः नंदंत्वणिमाद्या-
द्या नंदंतु भैरवादयः नंदंतु देवताः सर्वाः सिद्धविद्याधरादयः ये चाम्नायविशुद्धाश्च मन्त्रिणः
शुद्धबुद्धयः सर्वदानंदहृदया नंदंतु कुलपालकाः इन्द्राद्यास्तर्पिताः सन्तु तृप्यन्तु वास्तुदेवताः
चंद्रसूर्यादयो देवास्तृप्यंतु मम भक्तितः नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये सर्वे ते सु

स्तो॰ ॥ विनोयोनमामाशुतिष्ठयमत्तया त्वयंतपितरः सर्वेक्रतवोवत्सरादयः खेचराभूचराश्चैवनृत्यंतः
194 ममभक्तितः श्मशानेस्वचरायेचयेचान्येदेवयोनयः सर्वेतिष्ठविनोयांतमत्वानयश्रुपद्गिणः प
17.4 यावन्तश्चैवयेनाः केदरागुहाः क्षपयोब्राह्मणाः सर्वेशांतिकुर्वंतुमेसदा तीर्थानिपश
वोगावोयेचान्येपुण्यभूमयः वृक्षाः पतिव्रतानार्यः शिवंकुर्वंतुमेसदा शिवंसर्वत्रमेवास्तु
पुत्रधारधनादिषु राजानःसाविनः संतुतेममागेतमेसदा शुभामेदिवसायांतुमित्राणितिष्ठ
तुमेशिवाः साधकाज्ञपिनः संतुशिवंतिष्ठतुपूजकाः येचापधियः तम्भूषणरतामति
दकाः पूजनेदैवाचारविरुद्धनष्टदयाङ्घ्रशाश्रुयेवाधकाः दृष्टाचक्रमपूर्वंमेदहदयार्यकौ
लिकदूषिकाःतेनेयांतुविनाशमत्रसमयेश्रीभैरवस्याज्ञया दृष्टारः साधकानांचसदेवास्ता
यदूषकाः शाकिनीनांमुखेयांतुममात्रत्वस्थिविशांतेसन्तताः श्रुत्वोनाशमायांतुममनिंदाः
करामुये दृष्टारः साधकानांचविनश्यंतुशिवाज्ञया येनिंदकास्तेप्रलयंप्रयांतुयेसाधका
स्तेप्रभवंतुसिद्धाः सर्वत्रदेवीकरुणावलोकापरः परेशीममसन्निधत्तो इतियतिनासर्वोत्ता
सैकानस्प्रतिषिच्यविशेषार्घ्यपात्रमद्धन्यमास्वन्त शिरःस्थितायगुरवेसमर्प्य तथैवतत्तं
दुकांत्रिः संतर्प्य मूलविद्यागुरुपादुकांविद्यांतेचस्वाहेतिमन्त्रादारभ्यकुर्पालिन्यास्यकपाले
वताम्विहवनव्वुहानज्लेपांत्रानरेहृकारापराश्रीपात्र शेषंप्रियशिष्यायप्रसादत्वुद्धाकिचि

194

इत्यात् सोपि स्वपात्रे कृत्वा तत्तले आज्ञीयादित्यर्घ्यं नियतिः ततः स्वस्वरूपदिष्टविधि
नाशेषकान्यं निवेद्य समापयेत् ततस्तां स्वादिपात्रे गंधपुष्पाक्षतान्वितं जलमापूर्य ॐ
नमो विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे नमः सवित्रे शुचये सर्वकर्मदायिने ह्रां ह्रीं सः
श्रीसूर्य एषोऽर्घ्यः स्वाहा इति सूर्यायार्घ्यं दत्वा कृतांजलिः ॐ यच्छिद्रं तपः छिद्रं यच्छिद्रं
जनेमम सर्वं तदछिद्रमस्तु भास्करस्य प्रसादतः इत्यछिद्रमवधारयेत् ततो मूलविद्य
या प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासान्विधाय बटुमूलवाद्देवताष्टक
न्यासान्विधाय प्रागुक्तगुरुस्तोत्रं पठित्वा श्रीगुरुं प्रणम्य मूलविद्याद्वितीयकूटेन नि
र्माल्यं शिरसि धृत्वा मूलपंचवर्णान्दक्षहस्ते कृत्वा श्रीपरदेवताभक्तेभ्यो नैवेद्यादिकं विभ
ज्य दत्वा स्वयमपि सहृद्भावजनैः सार्धं भक्त्वा स्वात्मानं कामकलारूपं भावयन्सुखं विहर
रेदिति श्रीपरदेवताया नित्यपूजाविधिः एवं बिंदुचक्रमारभ्य चतुरस्रांतेषु पूजयेत् ए
षा सृष्टिक्रमपूजा ॥ या कौलचतुरस्राद्बिंदुचक्रांतेषु पूजयित्वा पुनर्बिंदुचक्राद्यचतुरस्रांतेषु पूजये
त् ॥ एषा संहारसृष्टिपूजा ॥ इति विस्ताराविस्ताराभ्यां पद्धतित्रयं एवं नित्यक्रमेण पूजयितुः स
र्वसिद्धिर्भवेत् सर्वमंगलमपि मंगलं स्यात् विस्ताराशक्तौ संक्षेपतोपि नित्यपूजां कुर्यात् त
त्र शुचिर्भूत्वा शुद्धासने उपविश्य पूर्ववद्विघ्नोच्चाटनपूर्वकं भूतशुद्धिं स्वदेहमातृकान्यासं च कृत्वा

सौर योगपीठन्याससपूर्वकं मन्त्रपुष्टमातृकान्यासं च कृत्वा योगपीठन्याससपूर्वकं प्राणायामत्रयं कृ-
१९५ त्वा मूलविद्यया ऋष्यादिकरषडंगन्यासान् विधाय करशुद्धिपुरःसरं षडंगयुवतीप्रासादव-
175 नाष्टकचतुष्पीठचतुस्तत्त्वात्मकं न्यासपंचकं कृत्वा अत्राप्यशक्तो प्राणायामऋष्यादिक-
रषडंगचतुरासनाष्टवाग्देवतात्मकं न्यासत्रयं वा कृत्वा मुद्रादर्शनोपयथाशक्तिमानसपू-
जां विधाय संक्षेपतः सामान्यार्घ्यश्रीपात्रे च स्थापयित्वात्मपूजां विधाय पीठपूजां कृत्वा पंचै-
यत्नीचेन्स्वचोपचारैः पंचायतनदेवताः संपूज्य श्रीचक्रे पूर्ववन्मूलदेवीमावाह्य षोडशभि-
र्दशभिः पंचभिर्वोपचारैः यथाशक्ति संपूज्य प्रागवत्विन्न्यासं मंडलादिषडंगयुवतीः पूजयित्वा
नवावरणदेवताः पूजयेत् अशक्तो चतुर्दशारमारभ्य बिंदुचक्रांतमावरणषट्कं पूज-
येत् ततो यथाविधि पूजाशेषं समापयेदित्ययं कल्पः अत्राप्यशक्तो बह्वारमारभ्य बिंदु-
चक्रांतमावरणत्रयं पूजयित्वा शेषं समापयेदित्यपरः कल्पः तत्राप्यशक्तो षडंगयुवतीः
पूजनेसायुधं त्रिकोणबिंदुचक्रे च यथाविधि पूजयेदिति परमापन्कल्पः अथवा सेवपथि दुर्गे
मस्थाने परचक्राद्यागमे सिंहव्याघ्रचौराद्युपद्रवभये कारागृहप्राप्तौ एवं प्रानादिसंभवे म-
नोभवे ज्ञाने स्थानपूजासाधनाद्यलाभे स्नानसंध्यादिकं यथाशक्ति निर्वर्त्य न्यासादिकमपि
यथाशक्ति विधाय यथाविधि ध्यात्वा वा सपूजाविधिनैवाज्ञासाधनपीठपूजां पंचायतन-
१९५

पूजा७२ः सर्वं मानसीमेव श्रीचक्रपूजां यथाविधि विधाय होमजपादिकमपि यथाविधि यथाशक्ति
कृत्वा समापयेत् इति मानसीपूजा समयस्थविधिस्थ ॥ इति संक्षेपपूजाविधिः ॥ एवमपि योन्त करो
ति स आधकोपानीति शिवशासन निषेसेदपूजा ॥ विस्तारतः कर्त्तुं सामर्थ्ये देशकालादि केवल
वापि स्यात्तस्मादिना चैकक्रियते न तदेव मनर्थकारित्वं भवति तस्मादायुत्तमम एवं यद्यूजनिषेधे
पः श्रीविद्यानन्दनाथेन शिववपुः प्रियसत्तुना कृते सौभाग्यरत्नाकरोत्तरं गोत्रं श्यक विंशतिः
२१ ॥ अथ नैमित्तिकपूजा ॥ तत्र दीक्षितः प्राप्तपूर्णाभिषेकः कृतपुरश्चरणो नित्यार्चनानिरतो
नैमित्तिकार्चनं कुर्यात् तत्र विशेषदिवसेषु क्रियमाणा महापूजा नैमित्तिकपूजेत्युच्यते विशे
षदिवसास्तन्त्रेषु पर्वत्वेनोक्तानि दिनानि तानि च गुरुपरमगुरुपरमेष्ठीगुरूणां जन्मवारतिथि
नक्षत्राणि स्वजन्मतिथिवारनक्षत्राणि विद्याप्राप्तिदिनं गुरोः त्यागदिनमष्टमीचतुर्दशीपूर्णि
मामावास्याः रविसंक्रान्तिः युगादिनानि ग्रहणं नवरात्र्यः शिवरात्रिः पीठोपपीठगमने देशिकागमन
वीरमहायोगिदर्शनतीर्थगमनव्रतदीक्षाफलसंविदिनानि विशेषदेवतागमने देवतादर्शनादु
त्सवतत्प्रसंगपानदिनानि विचारस्वरूपसंधानदिनमिति एकस्यादुत्सवदिनादुत्सवैनोदयादुत्सवन
वदर्शने यस्मिन् दिने तद्दिने विशेषपर्वतेषु नित्यपूजानन्तरं यथाबलं यथाश्रद्धं यथादेशं य
थाविभवविस्तरं वित्तशाठ्यरहितो यथोक्तद्रव्यैः यथाबलं यथाश्रद्धं यथाकालं यथादेशं य

सौर · याविभवविस्तरेविलसद्वावाहितोयथोक्तद्रव्यैः यथागुरूपदेशाच्छक्तिमामवाप्यकैः सार्धंविशेषपू-
१५८ जांकृत्वा यथाशास्त्रंगुरून्सामयिकांश्चपरितोषयेत् अत्रगुरुपर्वसुगुरुपंक्तिपूजोत्क्रमानवौघगुरू-
176 न्दिव्यौघान्साधकान् ततस्त्रासामसर्वोपचारैः समभ्यर्च्य यथाशक्तिदक्षिणादानादिभिः परितो-
षयेत् चैत्रादिफाल्गुनान्तेषुमासेषुशुद्धादशम्यांपूर्णिमासुविशेषपूजांकुर्वीत तद्यथातत्रादौचैत्रे
मासिपूर्णिमायांदमनैः पूजयेत् तत्रचैत्रशुक्लत्रयोदश्यांसाधकः कृतनित्यः सायंसाधकैः सार्धं
दमनसमीपंगत्वा पवीत्रकचतुष्कल्पलताविधायेदंमनमभिमंत्र्यासनेसमुपविश्य प्राणाया-
मन्त्रयन्त्रिरक्षादिकरषडंगन्यासांश्चविधाय ॐकामभस्मसमुद्भूतरतिबाष्पजलोद्भव अत्रसन्निधि
वेदेवादिभिराहितोयत्नमोस्तुते सांवत्सरीकपूजायाः परिपूर्णत्वसिद्धये दमनत्वममापाहित
मस्तुचनमोस्तुते ॐशिवप्रसादसंभूतअत्रसन्निहितोभव शिवकार्यंसमुद्दिश्यनेतव्योसि शि-
वज्ञया इतिदमनमामंत्र्यनन्तकामदेवंरतिंचतत्तन्मंत्रेणवक्ष्यमाणप्रकारेणध्यात्वासंपूज्यगृह-
मागच्छेत् ततश्चतुर्दश्यांकृतनित्यकृत्यः साधकः साधकैः सार्धंपुनर्दमनसमीपंगत्वा स्वमंत्रे-
णदमनंसमूलंउत्पाट्ययथाशास्त्रेणवाउच्छाच्छिद्य नागरहमानीय ॐयोंयेंऐंओंयोंयेंह्रींयोगर्योंरत्नेश्री
सर्वतः सर्वसर्वेभ्योनमस्तेरुद्ररूपेभ्यः ह्रींश्रींश्रींमंत्रेणदमनमभ्युक्ष्य पूजास्थानेत्रुचित्वात्रेद-
मनेनवधाविभज्य मध्येष्टसुदिक्षुचमेस्थाप्य तुमंत्रेणचंदनागुरुकर्पूरकुंकुमादिपंकैः संलिप्य

हें नमः सें नमः हों नमः में नमः लों नमः वें नमः र्यें नमः यें नमः ॐ नमः इति नवधा विभक्तं दमनं
मध्यादि प्रादक्षिण्येन संपूज्य तथा वा नैवेद्यवर्ती वा स्वेन नवधा विभक्तेन पूजयेत् ततो स्त्रेण संर
क्ष्य त्रिशूलमुद्रां वद्ध्वा कवचमंत्रेण दमनं तोय परिप्लावयेत् ततो नूतनवस्त्रेणाच्छाद्य रहसि दम
नं स्थापयेदित्यधिवासनं चतुर्दश्यां रात्रौ कुर्यात् ततः पौर्णमास्यां प्रातः स्नात्वा नित्यपूजां
निर्वर्त्य सामयिकैः सार्धं रात्रौ स्वस्तिवाचनपूर्वं तं दमनं पूजास्थानमानीय एवं यथा धिवा
सनाकरणे च तर्दश्यां सांपत्तने प्रोक्तविधिना दमनं नमामंत्र्य पूर्णिमायां दमनमानीयेत् वा पू
र्णिमायामेव दमनमामंत्र्यानीयोक्तविधिनास्याधिवासनं विधाय पुरतः सिंदूरेण चतुरस्रं
तद्बहिर्वेष्टितं नवयोनिचक्रं विधाय तत्र स्नानवस्त्रेणा निपुष्पेण दिव्यवितानं नवकलशानु एव
पुंजोपरि दीक्षाप्रकरणे वक्ष्यमाणविधिना मध्ययोनौ वेदी वा कृत्वा कुंभं संस्थाप्य स्वासनपूजादि
पीठपूजां नेत्रावह्निस्नानं समन्त्रपत्रे वा कृत्वा पंचापत्तनं कर्मीवेतुगणेशादीन्दमनैः संपूज्य
स्वदक्षिणभागे सर्वतोभद्रमंडले वक्ष्यमाणप्रकारेण कृत्वा तदग्रमध्ये अष्टदलकमले वा सिंदू
रादिना कृत्वा तन्मध्ये अशोकतरुं पंचवर्णरजोभिरारभ्य अशोकाय नम इत्यभ्यर्च्य कामस्त्रीशोक
नाशन शोकार्तिहरमे नित्यमानंदजननयस्व मे इत्यशोकतरुं प्रार्थ्य अशोकायन मः इत्यशोक
तरुं संपूज्य ॐ उद्यादिपल्लवांतायः कामरूपो महाबलः कल्पयंत्स्यधि विश्वं यत्तस्मै कालात्

सौर॰ मवेनमः इतिकालंचसंपूज्य अशोकतरोरधस्त्रिकोणमंडलेमंडूकादिपरतत्त्वांतेयोगपीठंसं॰
१९९ पूज्य अष्टदलकेसरेषु प्रागादिप्रादक्षिण्येन ॐ ह्रीं भाग्यायैनमः हृद्यायैनमः वर्यायैनमः
गर्भेमष्टदलकमलेचेष्टासरश्रृकचतुरश्रपार्श्वेस्थितेपूज्यामंडलेकृत्वा तन्नित्यायैनमः भोग्यायै
177 नमः प्रीत्यैनमः संगमायैनमः निर्वाणायैनमः कामकायैनमः इतिमध्यानेसंपूज्य ह्लीं
सर्वशक्तिकमलासनायनमः इतिसमस्तपीठंसंपूज्य ततःॐकामदेवायविद्महेपुष्पबा॰
णायधीमहि तन्नोवंगःप्रचोदयात् इतिकामगायत्र्या कामदेवमावाह्यावाहनादिमु॰
द्राश्वनिर्दिष्टे पाशांकुशधनुर्बाणमुद्राःप्रदर्श्य कामदेवंतरुणमरुणवर्णंरक्तवस्त्राभरण
माल्यानुलेपनेवामदक्षिणयोरतिप्रीतिभ्यांशोभितं पुष्पबाणेक्षुधनुर्धरंवसंतसहितंध्या॰
त्वा ॐ ऐं ह्रीं श्रीं क्लीं कामायनमः इतिमंत्रेणगंधादिपंचोपचारैःकामदेवंसंपूज्य तद्वामभा
गेरतिंगौरवर्णांसर्वालंकारभूषितांरक्तवस्त्रपरीधानांपद्मकरांध्यात्वा श्रीं श्रीं श्रीं श्रीं क्रों
रत्यैनमः इतिमंत्रेणगंधादिपंचोपचारैःसंपूज्य कामस्यदक्षिणभागेप्रीतिंश्यामवर्णांसर्वा
लंकारभूषितांरक्तवस्त्रपरीधानांनीलोत्पलकरांध्यात्वा ५ श्रीं श्रीं श्रीं श्रीं क्रों प्रीत्यैनमः इतिप्री
तिंपंचोपचारैःसंपूज्य ततःकामदेवस्याग्रेकदेववनमध्येवसंतंगौरवर्णं वामहस्तेनसहधा॰
कंभंदक्षिणहस्तेनचूतपुष्पस्तबकंदधानं रक्तवस्त्राभरणभूषितंरक्तमाल्यानुलेपनंध्यात्वा १९८

वंवसंताय नमः इति मंत्रेण पंचोपचारैः वसंतं संपूज्य पुनर्मध्ये कामदेवं पुष्पांजलिना संपू-
ज्याष्टदलकेसरेषु रक्तश्रीखण्डरचया पद्ममध्ये चतुर्दिक्षु च क्लीं शिरसे नमः क्लैं कवचा
य नमः क्लौं नेत्राय नमः क्लः अस्त्राय नमः इति षडंगानि संपूज्याष्टदलेषु प्रागादि प्रादक्षि
ण्ये नमः कामाय नमः भस्मशरीराय नमः अनंगाय नमः मन्मथाय नमः वसंतसखा
य नमः स्मराय नमः इक्षुचापधराय नमः पुष्पबाणाय नमः इत्यष्टौ कामान् संपूज्य बहि
श्चतुरस्रे लोकपालांस्तदस्त्राणि च संपूजयेत् ततः पुनः कामदेवं तन्मंत्रेण संपूज्य धूपदी
पादिकं दत्त्वा प्रणम्य कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोनंगः प्रचोदयात्।
इति कामगायत्रीं यथाशक्ति जपित्वा समर्प्य नमोस्तु पुष्पबाणाय जगदानंदकारिणे म
न्मथाय जगन्नेत्ररतिप्रीतिप्रियाय चेति कामदेवं प्रणम्य मूलविद्यया ऋष्यादिकरषडं
गन्यासान् कृत्वा मध्ये कुंभे भगवद्देवीमावाह्य षोडशोपचारैः संपूज्य प्राग्वत्तिथिनित्या
दिलोकपालांतावरणक्रमेण दमनैः संपूज्य आवाहितासि देवेशि पूजाकाले मया शिवे
कर्तव्यं तु यथालाभं पूर्णं भवतु तदाज्ञया इति विज्ञाप्य देवीं गंधपुष्पादिभिः दमनैः पुनः सं
पूज्य प्राग्वद्धूपदीपनैवेद्यानि निवेद्य नैमित्तिकहोमं नित्यहोमोक्तविधिना संस्कृतेग्नौ
नित्यहोमद्रव्यैः केवलहुतेन वा नित्यहोमसंख्यात्रिगुणं कृत्वा प्राग्वद्दानोपचारमहदा

सौर॰ त्रिकुमारीसुवासिनीवटुकादिपूजां विधाय सर्वान्भोजनवस्त्रालंकारदक्षिणाताम्बू-
१९८ लादिभिः परितोष्य स्वगुरुं गोभूहिरण्यवस्त्रालंकारपूजाप्रणतिभिः परितोष्य तदभा-
वे तत्पुत्रं तत्कलत्रादीन् अन्यं वा महायोगिनं संपूज्य दक्षिणादानादिभिः परितोष्य मू-
178 लविद्यां तिन्यूनपात्रिगुणं संख्येयं जपित्वा श्रीगविद्यामपि तथा जपित्वा देव्यै जपं समर्प्य स्तु-
त्वा पुनः पुनः प्रणम्य षोडशोपचारे जगन्मातर्वांछितार्थफलप्रदे कामान्पूरय मे देवि का-
मं कामेश्वरेश्वरि इति देवीं प्रार्थ्य पुनः कामदेवं तन्मन्त्रेण दमनैः संपूज्य रतिप्रीतिव-
संतांश्च दमनैः संपूज्य धूपदीपनैवेद्यतांबूलानि निवेद्य प्राग्वत्स्तुत्वा प्रणम्य कामदे-
वं तन्मन्त्रेण दमनैः संपूज्य रतिप्रीतिवसंतांश्च दमनैः संपूज्य धूपदीपनैवेद्यतांबूलानि नि-
त॰ वेद्य प्राग्वत्स्तुत्वा प्रणम्य कामदेवं सवसंतं विसृज्य पुष्पांजलिमादाय समस्तचक्रचक्रे-
शि सर्वविद्याधारिणि वेदमातर्नमोऽस्तु ते॰ हृष्टा त्वदाज्ञया इति देवीं प्रार्थ्य पुष्पांजलिं
दत्वा प्राग्वद्देवीं विसृज्य श्रीपात्रोद्वासनादि प्राग्वद्यथा गुरूपदेशं विधाय प्रातःसामयिकं
सर्वान्संतोष्य ब्राह्मणान्भूरिदक्षिणाभोजनादिभिः परितोषयेदिति दमनपूजाविधिः॥ इयं दमन-
पूजा यदि चैत्रपूर्णिमायां न संपद्यते तदा चैत्रशुक्लस्याष्टमीनवमीचतुर्दश्यन्यतमतिथौ कार्या
चैत्रमासि चेन्न भवेत् तदा वैशाखे ज्येष्ठे वा मासि शुक्लतिथिष्वन्यतमतिथौ ऊर्ध्वेन यथा चैत्रे
१९८

मासि पूर्णिमायामेव लग्नकाले संभवैः पुष्पैः सचंदनकर्पूरकुंकुमद्रव्यैर्वसंतेनोत्सवपूजां कुर्या-
त्‌ अत्रापि नैमित्तिकपूजायां सर्वेत्रपूजाद्रव्याणि पूर्ववन्निक्षिप्य पवित्रस्थाने ध्रुवविन्यासे
निधाय मूलविद्ययाभ्युक्ष्य मूलविद्ययावाहितं निष्पादितविद्यया च गंधपुष्पधूपनमस्कारा-
द्यैः पंचोपचारैरभ्यर्च्याधिवासनं विधाय परेद्युः स्वनित्यक्रमार्चनान्तेः नैः सविशेष-
पूजनं कृत्वा स्वगृहपूजनं च कुर्यात्‌ दीक्षिताधारणमधिवासनं पूजनं च सर्वं चैत्रेय नैमि-
त्तिकार्चनेन सर्वदा राज्ञा चैव कार्यं नित्यार्चने दिवा कुर्यात्‌ रात्रौ नैमित्तिकार्चनं उभयोः
काम्यकर्माणि चेति शास्त्रस्य निर्णय इति कुलार्णववचनात्‌ अत्रैव श्रावणे मासि पूर्णि-
मायां हिमजलैः कर्पूरकस्तूरीचंदनोन्मिश्रैः शीतलोदकैर्वा प्राग्वदधिवासनपूर्वकं
विशेषपूजां कुर्यात्‌ अथ माघे मासि पूर्णिमायां विशेषपूजां विधाय कदलीपनसाम्र-
फलैर्महानैवेद्यं देवीं परितोष्य गुर्वादिपूजनं च कुर्यात्‌ आषाढे मासि पूर्णिमायां एला-
ककोलजातीफलकुंकुमान्वितैश्चंदनैः पूजयेत्‌ अथ श्रावणे मासि पूर्णिमायां पवि-
त्रारोपणं कुर्यात्‌ अथ श्रावणमासोत्सवलक्षणं मिथुनसंक्रमणमारभ्य तुलासंक्रा-
न्तिपर्यंतं पवित्रोत्सवस्य कालः तिथयस्तु पक्षद्वयेपि चतुर्दशी पूर्णिमा चेति अत्रोत्तरोत्त-
रं गौणः कालः पवित्राणि स्ववर्णरूपाणि स्वपदस्थत्वदर्भमयत्रै शाणतन्तुवल्कलकर्पासस्त

सौर
१९९
179

त्रिगुण्यतेन सूत्रेण कुर्यात् कर्पासस्सूत्रं चेत्तत्त्व ब्राह्मणीभिः कृतं त्रिगुणं त्रिगुणीकृत्य तन्तवः सूत्रं सैकसप्तते
न कल्पितैर्भक्तसंख्यैः सूत्रैः पवित्राणि कुर्यात् तत्र षोडशाङ्गुलदैर्घ्याणि षोडशसूत्रैः षोडशग्रन्थि
युक्तानि नवाङ्गुलदैर्घ्याणि नवसूत्राणि नवग्रन्थियुक्तानि वा यस्मिन्नावरणे यावन्तः शक्तयस्त
त्संख्याङ्गुलसूत्रग्रन्थियुक्तानि वा पवित्राणि कुर्यात् तत्रावरणशक्तिसंख्याङ्गुलायामादिकं प
वदशानित्यानां पञ्चदशाङ्गुलादिकं वा राशीकृत्य कृत्वा योग्यमङ्गलदैर्घ्यादवपवित्राणि कुर्यात्
म्नायुधानामष्टाङ्गुलदैर्घ्यमष्टग्रन्थियुक्तानि षडुरूपक्तित्रयस्तन्तदायोन्कगुहसंख्याङ्गुलादि
कं नवाङ्गुलादिकं वा पवित्राणि कुर्यात् इत्थं श्रीचक्रे सन्निरवनाहं दृसमसंख्यानि पवि
त्राणि उक्तपदे सैकपञ्चाशत्सारीणि कृत्वा षट्त्रिंशत्सूत्रग्रन्थियुक्तमेकं वितानात्मजा
विष्टरमानदैर्घ्यं स्यात् ततः क्रमागमत्रिशिष्याणां च स्कन्धादिनाभिपर्यन्तदैर्घ्यमेरीहस्तपत्ता
त्रमात्रि सूत्रग्रन्थिकमसेषां सामान्ययोगिना कौनां एकग्रन्थिनवसूत्रयुक्तानि मेऽउप सैकसूत्र
णवेष्टनप्रमाणग्रन्थिरहितं पवित्रं कुर्यात् अत्रावरणशक्तिसमसंख्याङ्गुलादिपक्षे स्यात्म
नः क्रमात्क्रमत्रिशिष्याणां च मूलदेवीवत् अत्र पवित्रेषु ग्रन्थयो बालामन्त्रेण कवचमन्त्रेण एवं
कार्याः ग्रन्थिषु सूत्रवेष्टनं यथेष्टमिति विधि इत्थं पवित्राणि विधाय पवित्रारोपणदिनात्पूर्वदिने
साधकः कृतनित्यकृत्यो रात्रौ सामयिकैः सार्धं पवित्राणि सुजातस्थाननमानीय पवित्रेस्थाने:

१९९
५६

सिंदूरादिना चतुरस्रमण्डलं विधाय तेन वस्त्रेण निबद्धं कृत्वा कविस्यां तेनास्मिन् तंतुले पवित्राणि संशो
धनाकुंकुमरक्तचन्दनकस्तूरीकुंकुमकर्पूरयुक्तैः प्रतिसूत्रमेकैकं लिप्त्वा लाजागोरिं
कायैर्ग्रन्थिस्थानेषु विविचित्राणि संस्थाप्य कार्पाससूत्रं कृत्वा निर्वृत्य पवित्राणि तदा तेषु नव
सूत्रेषु ॐकाराय नमः चन्द्रमसे नमः वह्नये नमः ब्रह्मणे नमः नागाय नमः गुहवे न
मः रवये नमः सदाशिवाय नमः सर्वदेवेभ्यो नमः इति देवताः संपूज्य शिरोमन्त्रेणाभिमं
न्त्र्य हृन्मन्त्रेणाभ्युक्ष्यास्त्रमन्त्रेणावकुण्ठ्य पवित्रं मूलविद्यया षडंगैः संपूज्य धेनुं शान्तिर्सं
स्रुपूजयित्वा तेषु स्रग्गंधकुसुमानि निधाय पंचरत्नानि सर्वौषधीश्च निक्षिपेत् पंचरत्नानि
तु हारकं मुक्ताफलं नीलं पद्मरागं मरकतं चेत्याख्यानि सर्वौषधयस्तु सर्षपकुष्ठहरिद्रादारुहरि
द्रा लोध्रमुस्ता चीरबिल्वं कुशिलीराख्या ततो नववस्त्रयुगेनाच्छादयेत् दिनत्रयं वासने विधाय (
पूर्वेद्युः साधकः स्नात्वा नित्यकृत्यं समाप्य स्वार्थं गत्वा चौद्धारपूजां पूर्वकं पूजास्थाने प्रविश्य
पूजामंडपं वितानादिभिरलंकृत्य पूजां विधाय द्वारदेवतां वितानान्यपूजां विधाय प्रयत्नेन प्रासादवास्तु
रक्षां महापवित्रं मालेव धृत्वा आसनपूजादिन्यासान् विधाय तत्र पूजां कुम्भस्थापनं कृत्वा
वैस्थापनाद्यात्मपूजान्ते पीठपूजां विधाय पंचायतनदेवताः संपूज्य पवित्रैः संभाव्य तस्मिन् कु
म्भे देवीमावाह्य सर्वोपचारैरभ्यर्च्य नित्यपूजाक्रमेणैव राशिमध्ये पवित्रैः संभाव्य तदंगदेवता

सौर. प्राग्वत्कृत्वा गृहे संतोष्य तस्मै पवित्रं समर्प्य पूर्णाहुतिं कृत्वा अग्रे पवित्राणि विधाय सर्वं
१५५ तत्तत्स्थानेषु पवित्रधारणं कृत्वा दमनपूजावत् प्राक्तिमामसपिकान् पवित्रादानभोजन
तांबूलदक्षिणादिभिः परितोष्य जपं विधाय देवीं विसृज्य ब्राह्मणादीन्भोजनभूरिदक्षिणा
180 दिभिः संतोषयेत् । एवं वत्सरं लाया मसरं ग्रंथिपुष्पाणि त्रीणि पवित्राणि कृत्वा प्राग्व
दधिवासनादि सर्वं कृत्वा तानि देव्यै समर्प्य शेषं समापयेत् । इति पवित्रारोपणविधिः ॥ अ
थ भाद्रपदे मासि पूर्णिमायां केतकपुष्पैः सापिवासे विशेषपूजां कुर्यात् । आश्विनशुक्ले मा
सि शुक्लपक्षप्रतिपत्तिथिमारभ्य पूर्णिमापर्यंतं पंचदशसु तिथिषु प्रत्यहं नित्यपूजानं
तरं नैमित्तिकत्वेन चक्रमंडले संपूज्य प्रतिपत्तिथिमारभ्यैकादिवृद्ध्या प्रतिपद्विधानादि
द्वितीयायां द्विशतं तृतीयायां त्रिशतमित्यादि जपहोमौ विधाय पूर्णिमायां तद्दिने पंचदश
शतजपानंतरं शतसंख्याकमधिकं जपित्वा होमानंतरं शतसंख्यहोमं कुर्यात् । प्रतिपदादि
तिथिषु एकादिवृद्ध्या पूर्णिमायां षोडश कन्या यथा भवंति तथा कन्यापूजनं च कुर्यात् । तत्र प्रत्य
हं प्रातः कन्यकायानिमंत्रणं कृत्वा पूजाजपहोमान्ते तां स्नातां तैलमलं कृत्वा पूजास्थाने
मृद्वासने समुपवेश्य तस्यां प्राणग्रंथिविधिना देवीमावाह्य संपूज्य वस्त्रालंकरणभोजनतांबूल
दक्षिणादानादिभिः परितोष्य प्रणम्य विसृजेत् । एवं बहुकन्यापूजनेऽपि प्रत्येकं पूजनं कुर्यात् ॥

अस्मिन्नेव मासि प्रतिपत्तिथिमारभ्य नवम्यन्तासु नवरात्रितिथिषु विशेषपूजां कृत्वा एकादिवृ
द्ध्या जपादिकं च विधाय कुमारीपूजनं चैकादिवृद्ध्या कुर्यात् तत्र नवरात्रेषु कुमारीपूजने ।
विशेषः प्रतिपद्येकवर्षा द्वितीयायां द्विवर्षा एवं नवम्यां नववर्षा कन्या पूज्या तत्रापि ति
थिकुमारी पूर्वदिनपूजितास्तु नवम्यामेकवर्षादिनववर्षान्ता नव कुमार्यः पूज्याः पूजयेत्
तासां नामानि तु प्रतिपदि शुद्धा द्वितीयायां बाला तृतीयायां ललिता चतुर्थ्यां मालिनी
पंचम्यां वसुंधरा षष्ठ्यां सरस्वती सप्तम्यां रमा अष्टम्यां गौरी नवम्यां दुर्गा मंत्रास्तु ऐं ह्रीं
श्रीं शुद्धायै नमः ऐं ह्रीं श्रीं ललितायै नमः इत्यादिनाममंत्रैः पूजयेत् अथवा नवयौवनस
पन्नाः पद्माकलक्षणाः सुवासिनीर्वा नवरात्रिषु पूजयेत् तासां नामानि तु हेलावागग
नारक्ता महोच्छुष्मा करालिका ऽछाता नन्दिका पाण्डुगी चेति अत्रापि मंत्रास्तु नाम्नैव हेले
लायै नमः इत्यादयः अत्र पूज्यापूज्यकुमारीणां लक्षणानि तत्र प्रथमं पूज्यालक्षणानि ।
श्रीकुलार्णवे अरोगिणीं सुपुष्टाङ्गीं सुरूपां व्रणवर्जितां एकवंशसमुद्भूतां कन्यां सम्यक्प्रपू
जयेत् अपूज्याः कुमारिकालक्षणानि तत्रैव हीनाधिकाङ्गीं कुष्ठीं च विशीलकुलसं
भवां ग्रंथिस्फुटितसर्वाङ्गीं रक्तपूयव्रणाङ्कितां जात्यंधां केकराक्षीं काणीं कुरूपां तनुलोम
शां सन्त्यजेद्दासीगर्भसमुद्भवां अथ फलविशेषः पूज्यकुमारीविशेषः ब्राह्म

सौर. १०४ णीसर्वकार्येषु जयार्थेन नृपं वशानो लाभार्थी वैश्यकं वशे सौम्या सुतार्थे शूद्रं वशानो दारुणे चांत्य
जातीनां पूजयेद्बुद्धिमान्नरः अत्र निमित्ते नैमित्तिकपूजायां कुमारीपूजायां कुमारीपूजास्वपि
उक्तजातिषु पूर्वं पूर्वो लाभे उत्तरोत्तरा पूज्येति अथ पूज्यसुवासिनीलक्षणानि सुरूपा तरु
(181) णी धृणा तत्कुलामदिता शुचिः शंकाहीना भक्तियुक्ता नृपं धृणा मंत्रोपयोगिनी अलोल
पा सुशीला च स्मिता सप्रियवादिनी गुरुदेवजनस्य भक्ता सुविद्या कौलिकप्रिया विमलस्व
रा विशेषज्ञा देवताराधनोत्सुका मंत्रतंत्रसमायुक्ता समयपालिका मनोहरा सदाचारा
धात्रिरे सुलक्षणा अथ वर्ज्यसुवासिनीलक्षणानि दुष्टा शाकर्कशा लम्बा कुसि
काकुलदूषिका दुराचारा परपराधीना भावहीना नवराल्पसा निद्रासक्ता तिदुर्भगा हीना
नी व्याधिपीडिता दुर्गंधा ह्रः विकलांगी अतिदीर्घा त्यतिह्रस्वा भिन्न उत्सुका कुत्सिताला
पा निर्लज्जा कलहप्रिया विरूपोन्मादिनी कृष्णांगा पापा विकलानना ईदृशीं मंत्रयुक्तां च
शक्तियागे विवर्जयेदिति अथ नवरात्रपूजा चैत्रादिफाल्गुनांतेषु द्वादशमासेषु चैत्राषाढा
श्विनपौष्यमासचतुष्टये चैत्राश्विनमासयो वा आश्विने वा शुक्लपक्षे प्रथमादि विशेषकार्या
पि तत्र नवरात्रकरणाशक्तो तृतीयादिनवम्यंते सप्तरात्रे पंचम्यादि पंचरात्रे सप्तम्यादि त्रि
रात्रे वा उक्ततिथि कुमारीपूजनादि भिन्ने वरात्रोत्सवं कुर्यात् एवमन्येपि नैमित्तिकपूजा विशे

१०४

षावरुद्धः सेति तेन चेद्गौरवभयान्न लिखिताः तेन मासपक्षैः गुरुहृतः शास्त्रतश्च ज्ञात-
व्याः अथ कार्त्तिकमासे पूर्णिमायां कुंकुमेन देवीं समभ्यर्च्य रात्रौ कुंकुमस्थंडिलादावग्निस्था-
पनं कृत्वा पिष्टमयैः घृतपूरितैः कर्पूरवर्तिदीपितैः प्रदीपैः तिलहोमक्रमेणैव कृत्वा भोग-
पेसावरणायै दीपदानेन चक्रयाग तत्र सप्तमे भूतले सिंदूरादिना विपुलं श्रीचक्रं विरच्य
तत्र देवीमावाह्य संपूज्य मध्ये बिंदुचक्रे षोडश दीपान् शर्करायुक्तपिष्टपक्वगोधूममादि
पिष्टरचितान् कर्पूरगर्भवर्तिकान् घृतपूरितान् प्रज्वालितान् मूलविद्यया मूलदेव्य-
ग्रे स्थापयित्वा तत्स्वतिन्यादि श्रीचक्रे पूज्य समस्तदेवताभ्यः तत्तन्नाम्ना स्थानेन तत्तत्सं-
ख्येण तत्तदग्रे एकमेकं दीपं स्थापयित्वा तत्तज्जेन एतावन्मात्रकरणाशक्तौ एकस्मिन्नस्त्रकोणादि
भाजनेन नवयोनिचक्रे अष्टदलकमले वा कुंकुमादिना निर्माय तस्मिन्नष्टोत्तरपात्रव
दीपान्मध्ये षष्ठयोनिदलेषु वामे स्थाप्य देवीमभ्यर्च्य तन्नामस्मरणपूर्वं समर्पयेत् अथ माघे
पौषमासि पूर्णिमायां कर्पूरयुक्तनारिकेलजलेन देवीं स्थापनेन विधाय सुगंधपुष्पादिभिः
संपूज्य माषपिष्टनिर्मितापूपैर्नैवेद्यं चक्रयागं अथ पुष्यमासि पूर्णिमायां देवीं संपूज्य
शर्करायुक्तं गुरुयुक्तं वा गव्यं दधिनैवेद्यं दद्यात् अथ माघमासि पूर्णिमायां पुष्पकैः कुसु-
तिलैर्देवीमावरणं संपूज्य शर्करायुक्तपायसादिनैवेद्यं च निवेदयेत् अथ फाल्गुण

मोर मालिकृणिमायां पंकजैः सर्वाणि रजनगुच्छैः कह्लारैर्मिश्रकुसुमैश्च देवीं संपूज्य जपेत्॥ इति नैमि
१८३ त्तिकपूजा॥ श्रीविद्यानन्दनाथेन शिष्यावबोधाय विरचितेन कृते ह्याविंशतिः प्रागल्भ्ये गोरक्ष
वारिधौ २२ अथ नित्यनैमित्तिकाचारेह निरतानां सिद्धविद्यानां विवेकिनां साधका
182 नां काम्यपूजाविधिर्लिख्यते तत्र काम्यानि षट्कर्माणि तानि तु रक्षा शान्तिर्जयला
भनिग्रहनिपातनाख्यानि तत्र रक्षा नाम राष्ट्रादीनां परचक्रचौरव्यालादिभयेभ्यः परि
पालनं रक्षा ग्रहजन्मभवनमपमृत्युश्चेन राज्ञो यावज्जादीनां कोपोपगमगति निरोधरूप
मानं शान्तिर्ज्वरजनानां भूतप्रेतपिशाचकृत्यारोगादिकोपद्रवनिवृत्तिः संग्रामद्वन्द्वयु
द्धवादद्यूतादिषु विजयो जयः अत्र राजामात्यप्रविकल्पनितादयः शात्रवकर्मकराभू
त्वा स्वाभीष्टान्यपि वस्तूनि वितरन्ति प्राणैः सह प्रपद्यन्ते इति तथाकर्षणमोहनवश्यापि जयान्तर्व
र्तितं तयोः सर्वजनविनिर्जयपरत्वात् वाणिज्यराजसेवादिभिरभीष्टसिद्धिवस्तुप्रा
प्तिर्लाभः विद्वेषणोच्चाटनव्याधिकरणादयो निग्रहः निपातनं मारणकर्म इति षट्कं
र्माणि तत्र रात्रिशेषे स्नातः कृतनित्यकर्मा साधकः शान्तः पंचघटिकांमिकेति दिवस ले
प्रथमभागे वसन्ततौ गोमयलिप्ते शुभे भूतले हरिद्रारजसा त्रिशूलाष्टकोपेतवि
पुलं चतुरस्रं भूमिमण्डलं विरच्य ॐ ऐं ह्रीं श्रीं ऊं ऊं क्रों गजेन्द्रवल्लभ्यै नमः इति भू
१८३
५१

मंडलेपूजयित्वा पुनरुक्तमंत्रमष्टाये श्लोकान्किंचिदेवाडंकोपूजयामीति भूपुरादिदे
वतामंडलमध्ये मिलितपीठ पुष्पाक्षतादिभिः संपूज्य तन्मध्ये स्वासनमारोप्य श्रीगु
रुविधिनासंपूज्य पश्चाद्विधवस्तुपूरेणोपगोरोचनादिपीठदेवता श्रीचक्रमुद्धृत्य तत्र
समस्तप्रकटेत्यादिसमष्टियोगिनीविषयापुष्पांजलिंनिधाय श्रीचक्रस्यसमीपे
कचिन्मीठान्तरे प्रयोगदिवसस्यवारेशान्तद्यतिथीशानक्षत्रेशादीन्नित्यादीन्विसर्गः
षट्पात्रदेवताः पंचाशान्निधुनदेवताश्चपूजयेत् तत्रवारेशास्तु रविवारस्यसूर्यः शि
वो चंद्रवारस्यसोमोंविका मंगलवारस्यभौमकुमारौ सौम्यवारस्यबुधस्यबुधोगुरुवा
रस्यबृहस्पतिर्विष्णु भृगुवारस्यशुक्रारमे शनिवारस्यकुबेरसौरी इतिवारेशानष्ट
यक्रमयक्रपूजयित्वातिथीशापूजनंकुर्यात् तिथीशास्तु प्रतिपद्यग्निः द्वितीयायाम
श्विनौ तृतीयायामुमा चतुर्थ्यांविघ्नराजः पंचम्यासर्पः षष्ठ्यांषण्मुखः सप्तम्यांरविः
अष्टम्यामातरः नवम्यांदुर्गा दशम्यांदिशः एकादश्यांधनदः द्वादश्यांकेशवः
त्रयोदश्यांयमः चतुर्दश्यांहरः पंचदश्यांचंद्रः नक्षत्रदेवतास्तु अश्विन्याः अश्विनौ भर
ण्यांयमः कृत्तिकायामग्निः रोहिण्यांधाता मृगशिरसःचंद्रः आर्द्रायाः शिवः पुन
र्वस्वोरदितिः पुष्यस्यगुरुः आश्लेषायाःसर्पः मघायाःपितरः पूर्वायाअर्यमा उत्तरायाः

सौर॰ भगः हस्तस्सूर्यः चित्रायांत्वष्टा स्वात्यांमारुतः विशाखायामिंद्राग्नी अनूराधायांमित्रः ज्ये
